अनुक्रमांकः ...................................
निरीक्षकस्य हस्ताक्षरम् ..........................

**Paper Code**
**MV-103**

# पतञ्जलिविश्वविद्यालयः

## परीक्षा – दिसम्बरमासः – 2018

## एम.ए. संस्कृत–व्याकरणम्, (सत्रम् : प्रथमसत्रम)
## तृतीयपत्रम् – संस्कृतव्याकरणम् (ग)

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' 'घ' इत्याख्येषु चतुष खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

### खण्डः क
### (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः** पृष्टेषु चतुर्षु द्वौ द्वीर्घप्रश्नौ समाधेयौ । (2×15=30)

1. 'अनेकाल् शित्सर्वस्य' इतिसूत्रं भाष्यदिशा व्याख्यायताम् ।
2. सञ्ज्ञोपसर्जनप्रतिषेधो वक्तव्यो नवेति ?
3. 'अव्ययीभावश्च' इति सूत्रस्य प्रयोजनानि कानि ?
4. 'एच' इग्घ्रस्वादेशे' इतिसूत्रं भाष्यमतेन व्याख्यायताम्।

### खण्डः ख
### (लघूत्तरोयप्रश्नाः)

**निर्देशः** पृष्टेषु सप्तसु चत्वारो लघुप्रश्नाः समाधेयाः। (4×5=20)

1. 'समानशब्दप्रतिषेधः' इतिवार्तिकस्य विभाषासञ्ज्ञाप्रसङ्गे कोऽभिप्रायः ?
2. इग्यणः सम्प्रसारणमित्यत्र वाक्यसञ्ज्ञा पक्षे के दोषाः, किञ्च समाधानम् ?
3. भवतः सर्वनामत्वे कानि प्रयोजनानि ?
4. 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येतिपरिभाषायाः कानि प्रयोजनानि ?
5. तातङ्विषये ङिच्च कथं न प्रवर्तते ?
6. 'उरण् रपरः' इत्यनेन सम्पाद्यमानो रेफो यदि पूर्वान्तः, तर्हि के दोषाः ?
7. 'स्थानेऽन्तरतमः' इत्यत्र तमब्ग्रहणेन किं साध्यते ?

### खण्डः ग
### (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः** पृष्टेषु त्रयोदशसु दश अतिलघुप्रश्नाः समाधेयाः। (01×10=10)

1. 'टकितौ' इत्यत्र कः समासः ?
2. 'कारयाञ्चकार' इत्यत्राव्ययसञ्ज्ञया किं प्रार्थ्यते ?
3. 'विश्वप्रियः' इत्यत्र प्रियस्य परनिपातः कथम् ?
4. 'क्रापयति' इत्यत्र काः धातुः ?
5. 'मग्नः' इत्यत्र कः प्रत्ययः, कस्माद् धातोः ?

6. 'निर्वृत्तिः' शब्दस्य कोऽर्थः ?
7. नष्टाश्वदग्धरथन्यायेन किमवगम्यते ?
8. 'उदोष्ठ्यपूर्वस्य' इत्यत्र कस्मात कः प्रत्ययः?
9. 'पैतृष्वसेयः' इत्यत्र कस्मात् कः प्रत्ययः?
10. 'सर्वनामानि' इत्यत्र णत्वं केन प्राप्नोति ?
11. 'एकैकस्मै' इत्यत्र केन द्विर्वचनम् ?
12. अव्ययसञ्ज्ञाया अन्वर्थता का ?
13. 'कृन्मेजन्तः' इत्यत्र कः समासः ?

## खण्डः घ

## (वस्तुनिष्ठप्रश्नाः)

**निर्देशः** पृष्टा वस्तुनिष्ठप्रश्नाः समाधेयाः। **(01×10=10)**

1. उपचारसञ्ज्ञया किं गम्यते ?
   (अ) विसर्गस्थानिकं सत्वम् (ब) नकारस्थानिकं णत्वम्
   (स) दश वर्णाः (द) मकारस्थानिकोनुस्वारः
2. 'दक्षिणपूर्वस्यां शालायाम्' इत्यत्र सर्वनामत्वं केन ?
   (अ) विभाषा जसि (ब) सर्वादीनि सर्वनामानि
   (स) पूर्वपरावरदक्षिणोत्तरा० (द) विभाषा दिक्समासे बहुव्रीहौ
3. 'सर्वादीनि सर्वनामानि' कः समासः ?
   (अ) द्वन्द्वः (ब) बहुव्रीहिः
   (स) तत्पुरुषः (द) न कोऽपि
4. 'सर्वो नाम कश्चित् तस्मै' इत्यर्थे किं रूपं शुद्धम् ..................
   (अ) सर्वस्मै देहि (ब) सर्वाय देहि
   (स) सर्वथा देहि (द) सर्वाभ्य देहि
5. 'न बहुव्रीहौ' अस्य सूत्रस्य किमुदाहरणम् ..................................
   (अ) दक्षिणदक्षिणस्यै देहि (ब) वसनान्तराः
   (स) प्रियविश्वाय (द) सर्वाणि
6. 'इग्यणः सम्प्रसारणम्' अनेन सूत्रेण सम्प्रसारणसञ्ज्ञा क्रियते ..................
   (अ) वाक्यस्य (ब) वर्णस्य
   (स) उभयोः (द) उभयोरपि न
7. 'मिदचोऽन्त्यात् परः' इत्यत्र यः मिदागमः सः ..................................
   (अ) पूर्वान्तः (ब) परादिः
   (स) अभक्तः (द) उभयतः
8. यत्रानेकविधमानन्तर्यं तत्र किं बलीयः ..................................
   (अ) स्थानतः (ब) अर्थतः
   (स) गुणतः (द) प्रमाणतः
9. 'निजेगिल्यते' इत्यत्र कः प्रत्ययः ?
   (अ) क्यच् (ब) क्यङ्
   (स) यङ् (द) क्यष्
10. 'अनेकाल शित्सर्वस्य' किं प्रकारकं सूत्रम् ?
   (अ) संज्ञासूत्रम् (ब) परिभाषासूत्रम्
   (स) विधिसूत्रम् (द) अधिकारसूत्रम्

---------------x---------------